# 11. वेदितव्यानि मित्राणि

[Known as the longest literary work in the entire world is the Mahabharata composed by Maharshi Vyasa. The Mahabharata has about one lakh Shlokas.

There are 18 'Parvas' in the Mahabharata. The first Parva is 'Adiparva' while the last is 'Swargarohanaparva'. In the twelfth one 'Shantiparva', solutions to many problems of life have been dealt with.

In the 'Shantiparva' there are 365 chapters. These chapters are further internally divided into 'Rajadharmanushasanaparva' (1 to 30), 'Aapaddharmaparva' (131 to 173) and 'Mokshaparva' (174 to 365) etc. Among these, in the 'Aapaddharmaparva' there is a dialogue between Bhishma and Yudhishthira which is a teaching on polity. In this there is one occasion where Yudhishthira is advised to maintain friends. During this advice, it is also shown how friends should be, how they are made and how they are helpful to us.]

वेदितव्यानि मित्राणि विज्ञेयाश्चापि शत्रवः ।
एतत् सुसूक्ष्मं लोकेऽस्मिन् दृश्यते प्राज्ञसम्मतम् ॥1॥

शत्रुरूपा हि सुहृदो मित्ररूपाश्च शत्रवः ।
सन्धितास्ते न बुध्यन्ते कामक्रोधवशं गताः ॥2॥



नास्ति जातु रिपुर्नाम मित्रं नाम न विद्यते ।
व्यवहाराच्च जायन्ते मित्राणि रिपवस्तथा ॥3॥

यो यस्मिन् जीवति स्वार्थं पश्येत् पीडां न जीवति ।
स तस्य मित्रं तावत् स्याद् यावन्न स्याद् विपर्ययः ॥4॥

मित्रं च शत्रुतामेति कस्मिंश्चित् कालपर्यये ।
शत्रुश्च मित्रतामेति स्वार्थो हि बलवत्तरः ॥ 5 ॥
तन्मित्रं कारणं सर्वं विस्तरेणापि मे शृणु ।
कारणात् प्रियतामेति द्वेष्यो भवति कारणात् ॥ 6 ॥
प्रियो भवति दानेन प्रियवादेन चापरः ।
मन्त्रहोमजपैरन्यः कार्यार्थं प्रीयते जनः ॥ 7 ॥
उत्पन्ना कारणे प्रीतिरासीन्नौ कारणान्तरे ।
प्रध्वस्ते कारणस्थाने सा प्रीतिर्विनिवर्तते ॥ 8 ॥
आत्मरक्षणतन्त्राणां सुपरीक्षितकारिणाम् ।
आपदो नोपपद्यन्ते पुरुषाणां स्वदोषजाः ॥ 9 ॥
शत्रून् सम्यग् विजानाति दुर्बला ये बलीयसः ।
न तेषां चाल्यते बुद्धिः शास्त्रार्थकृतनिश्चया ॥10॥

## Glossary

**Noun : (masc.) :** **लोकः** world, universe **व्यवहारः** behaviour, conduct, action **स्वार्थः** selfishness **विपर्ययः** reverse, inversion **कालपर्ययः** passage of time **प्रियवादः** pleasing words.

**(Fem.) :** **पीडा** unhappiness, pain **शत्रुता** enemity **मित्रता** friendship **प्रीतिः** love, affection

**(Neut.) :** **कारणम्** cause, purpose

**Pronoun :** **एतत्** this (neu.) **अस्मिन्** in this (masc. or neu.) **यस्मिन्** in which (masc. or neu.) **मे** my **ये** those (masc.) **तेषाम्** their (masc. or neu.)

**Adjective :** **वेदितव्य** worthy to be known **विज्ञेय** worthy to be known **सुसूक्ष्म** very minute **सम्मत** acceptable **सन्धित** associated **बलवत्तर** very powerful **द्वेष्य** to be hated **अपर** another **प्रध्वस्त** destroyed, ruined

**Adverb :** **हि** really **जातु** proper

**Compound :** प्राज्ञसम्मतम् (प्राज्ञानां सम्मतम् प्राज्ञसम्मतम् । षष्ठी तत्पुरुष) । कामक्रोधवशम् । (कामः च क्रोधः च इति कामक्रोधौ, (इतरेतर, द्वन्द्व) । कामक्रोधयोः वशः कामक्रोधवशः, तम् । षष्ठी तत्पुरुष) कालपर्यये (कालस्य पर्ययः कालपर्ययः, तस्मिन् । षष्ठी तत्पुरुष) । मन्त्रहोमजपैः (मन्त्रः च होमः च जपः च मन्त्रहोमजपाः, तैः । इतरेतर द्वन्द्व) । आत्मरक्षणतन्त्राणाम् (आत्मनः रक्षणम् आत्मरक्षणम् (षष्ठी तत्पुरुष) । आत्मरक्षणस्य तन्त्रम् आत्मरक्षणतन्त्रम्, तेषाम् । षष्ठी तत्पुरुष) । स्वदोषजाः (स्वस्य दोषः स्वदोषः (षष्ठी तत्पुरुष) । स्वदोषात् जायन्ते इति स्वदोषजाः, उपपद तत्पुरुष) ।

**Root : (First Gana) :** (Atmanepada) **वि+नि+वृत्** (विनिवर्तते) to turn back

**(Fourth Gana) :** (Atmanepada) **विद्** (**विद्यते**) to be **जन्** (**जायते**) to be born / produced

## Notes

**(1) Meaning :** **वेदितव्यानि** worthy to be known, should be known **दृश्यते** is seen **आपद्** difficulty, adversity **शत्रुरूपाः** to be like enemies **मित्ररूपाः** to be like friends **न बुध्यन्ते** can not be known **जीवति** when alive (locative absolute) **स्यात्** may happen **एति** goes, attains **कस्मिंश्चित्** in a certain, in some **प्रियवादेन** due to the pleasant words **कार्यार्थम्** to fulfil the work **प्रीयते** is delighted **कारणान्तरे** to fulfil other purpose **आत्मरक्षणतन्त्राणाम्** of independent people for one's protection **सुपरीक्षितकारिणाम्** of those who work after careful examination **आपदः** difficulties **नोपपद्यन्ते** do not occur **विजानाति** knows very well **बलीयसः** to powerful **चाल्यते** is moved **शास्त्रार्थकृतनिश्चया** decided on the basis of meaning of Shastras.

**(2) Sandhi :** विज्ञेयाश्चापि (विज्ञेयाः च अपि) । लोकेऽस्मिन् (लोके अस्मिन्) । शत्रुरूपा हि (शत्रुरूपाः हि) । सुहृदो मित्ररूपाश्च (सुहृदः मित्ररूपाः च) । सन्धितास्ते (सन्धिताः ते) । नास्ति (न अस्ति) । रिपुर्नाम (रिपुः नाम) । व्यवहाराच्च (व्यवहारात् च) । रिपवस्तथा (रिपवः तथा) । यो यस्मिन् (यः यस्मिन्) । स तस्य (सः तस्य) । स्याद् यावन्न (स्यात् यावत् न) । स्याद् विपर्ययः (स्यात् विपर्ययः) । शत्रुतामेति (शत्रुताम् एति) । शत्रुश्च (शत्रुः च) । मित्रतामेति (मित्रताम् एति) । स्वार्थो हि (स्वार्थः हि) । तन्मित्रम् (तत् मित्रम्) । विस्तरेणापि (विस्तरेण अपि) । प्रियतामेति (प्रियताम् एति) । द्वेष्यो भवति (द्वेष्यः भवति) । प्रियो भवति (प्रियः भवति) । मन्त्रहोमजपैरन्यः (मन्त्रहोमजपैः अन्यः) । प्रीतिरासीन्न (प्रीतिः आसीत् न) । प्रीतिर्विनिवर्तते (प्रीतिः विनिवर्तते) । आपदो नोपपद्यन्ते (आपदः न उपपद्यन्ते) । दुर्बला ये (दुर्बलाः ये) ।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) कस्मात् मित्राणि रिपवः च जायन्ते ? ◯

(क) शास्त्रज्ञानात् (ख) व्यवहारात् (ग) दैवात् (घ) बुद्धिबलात्

(2) प्रध्वस्ते कारणस्थाने सा प्रीतिः .......... । ◯

(क) विनिवर्तते (ख) जायते (ग) वर्धते (घ) दृश्यते

(3) आत्मरक्षणतन्त्राणां पुरुषाणां किं न उपपद्यते ? ◯

(क) आपत्तिः (ख) सुखम् (ग) सम्पत्तिः (घ) स्वार्थम्

(4) शत्रुमित्रसम्बन्धे कः बलवत्तरः ? ◯

(क) स्वदोषः (ख) स्वार्थः (ग) प्रियालापः (घ) लोकः

(5) मित्रं कदा शत्रुताम् एति ? ◯

(क) भाग्यक्षये (ख) मृत्युकाले (ग) कालविपर्यये (घ) धनागमे

**2. अधोलिखितानां प्रश्नानां संस्कृतभाषया उत्तरं लिखत ।**

(1) किं रूपाः सुहृदः शत्रवः च ?

(2) मित्राणि रिपवः च कथं जायन्ते ?

(3) जनः कस्मात् प्रियताम् एति ?

(4) कीदृशानां पुरुषाणाम् आपदः न उपपद्यन्ते ?

(5) यः शत्रून् सम्यग् विजानाति तस्य किं भवति ?

**3. समासप्रकारं लिखत ।**

(1) प्राज्ञसम्मतम् ....................

(2) कालपर्यये ....................

(3) कामक्रोधौ ....................

(4) मन्त्रहोमजपैः ....................

**4. उदाहरणानुसारं शब्दरूपैः रिक्तस्थानानि पूरयत ।**

**उदाहरणम् :**

| | | | |
|---|---|---|---|
| | मित्रम् | मित्रे | मित्राणि |
| (1) | पीडाम् | .................... | .................... |
| (2) | .................... | .................... | लोकेषु |
| (3) | दानेन | .................... | .................... |
| (4) | कारणात् | .................... | .................... |

**5. उदाहरणानुसारं प्रदत्तान् शब्दान् आधृत्य वाक्यरचनां कुरुत ।**

**उदाहरणम् :** Children are eating fruits. (बाल, फल, खाद्) - बालाः फलानि खादन्ति ।

(1) Meghana drinks water. (मेघना, जल, पा-पिब्)

(2) Adhish reads a book. (अधीश, पुस्तक, पठ्)

(3) A snake goes into the hole. (सर्प, बिल, गम्-गच्छ्)

(4) Anila calls Amit. (अनिला, अमित, आ+ह्वे-ह्वय्)

(5) Aarsh bows to Guru. (आर्ष, गुरु, नम्)

**6. मातृभाषया उत्तरं लिखत ।**

(1) What according to the composer of the Mahabharata is the reason of becoming a foe (enemy) or a friend ?

(2) Why does a friend become an enemy (foe) ?

(3) Whose mind (intellect) is not disturbed even in difficulties ?

**7. श्लोकपूर्तिं कुरुत ।**

(1) नास्ति जातु ......... रिपवस्तथा ।

(2) आत्मरक्षणतन्त्राणां ........ स्वदोषजाः ।

**Activity**

- Find out and read the incidents of Mahabharata.
- Use audio-visual aids to know about Mahabharata.